International Journal of Sanskrit Research 2014; 1(1): 12-14

International Journal of Sanskrit Research
अनन्ता

ISSN Number: 2394-7519
IJSR 2014; 1(1): 12-14
© 2014 IJSR
www.sanskritjournal.com
Received: 18-09-2014
Accepted: 07-10-2014

**Nandan Kumar Tiwari**
Academic Associate, Dept. of Jyotish, Uttarakhand Open University, Teen pani bypass road, Haldwani, Nainital.

**Correspondence**
**Nandan Kumar Tiwari**
Academic Associate, Dept. of Jyotish, Uttarakhand Open University, Teen pani bypass road Haldwani, Nainital.

# मकरन्दप्रकाशस्य परिचयः
# An Introduction of Makrandprakash

## Nandan Kumar Tiwari

**सारांशिका**
भारतवर्षे पंचांगनिर्माणस्य परम्परा प्राचीनकालादेव प्राप्यते। मुख्यत्वेन त्रयः पक्षोपरि पंचांगनिर्माणानां भवति – आर्यपक्षः, सौरपक्षः ब्राह्मपक्षश्च। मकरन्दप्रकाशः सौरपक्षस्य परम्परायां समायाति। षोडशशकाब्द्यां आचार्यनारायणदैवज्ञेन द्वारा 'मकरन्दप्रकाशः' नामक ग्रन्थस्य विरचितवान। सर्वप्रथमं मकरन्दीय पंचांगस्याधारः आचार्यमकरन्देन चतुर्दशशकाब्द्यां; 1400 सौरपद्धतेन; सूर्यसिद्धान्तस्य मकरन्दीयसारियाः निर्माणं कृत्वान् कृतवन्तः। मकरन्दीयपरम्परायां मकरन्दीयसारिणी, मकरन्दविवरणं मकरन्दप्रकाशश्च ग्रन्थत्रयाणां सन्ति। गणितादि सह फलादेशादि कथनं ग्रन्थाऽस्य वैशिष्ट्यमस्ति । ग्रन्थेऽस्मिन् चतुर्दश अध्यायाः सन्ति, सरलपद्धतिनां पंचांगनिर्माणार्थं गणितादि विवेचनमस्ति। मकरन्दप्रकाशः स्वकीयकालखण्डे अभूतपूर्वग्रन्थमस्ति सुविदितमेव सर्वे पंचांगकारानामिति।

**कूटशब्दः** अन्तर्निहित, अक्षुण्ण, सैद्धान्तिक, परवर्ती, मर्मस्पर्शी, रसाभास, दशार्णेश, प्रभातकालीन ।

**प्रस्तावना**
सर्वसामान्यजनोऽपि सृष्टेर्विभिन्नचमत्काराणां ज्ञानं प्राप्नुयादिति हेतोः अस्माकं देशस्यालौकिकबुद्धिमन्तस्त्रिकालज्ञा महान्तस्तपस्विनो महात्मनो महर्षयश्च अनेकेषां शास्त्राणां निर्माणमकुर्वन्। तेषु निर्मितेषु शास्त्रेषु 'ज्योतिषशास्त्रस्य' प्रथमं स्थानमस्ति। यतः सृष्टेः प्रत्येकस्य वस्तुन उत्पत्तिः, प्रगतिः, लयादिश्च कालस्यैवाधीनं वर्त्तते। ज्योतिषाणां ग्रहनक्षत्रतारादीनां प्रबोधजनकं शास्त्रं ज्योतिषमिति। इदं कालविधायकत्वेन कालविद्या मन्यते। कालान्तर्गताः सर्वे विषयाः चराचरव्यक्तविश्वविस्तारस्तदवगमकत्वेन प्रयोगात्मकानि शास्त्राणि च समागच्छन्ति। परमधुना ज्योतिषशास्त्रेण त्रिस्कन्धात्मकं दिग्देशकालविधायकं तत्प्रभावनिरूपकशास्त्रं हि मन्यते।

**मकरन्दप्रकाशः** ज्योतिषशास्त्रस्य तन्त्रगन्थोऽस्ति। भारतवर्षे पंचांगनिर्माणार्थे ये ग्रन्थाः समुपलब्धाः तेषु ग्रन्थेषु कश्चिद् ग्रन्थः सरलं तथा च कश्चिद् विरलरूपमेव समुपलभ्यते। मकरन्दप्रकाशः पंचांगनिर्माणाय सम्यक् व सरल ग्रन्थरूपमेव लोके प्रसिद्धः, सुविदितमेव सर्वेषां पंचांगकारानामिति।
नूनं कालज्ञानार्थं पंचांगानां निर्माणं भवति। कालशास्त्रीयमध्ययनं विना कालसापेक्षिकवैदिकयज्ञसम्पादनं दिग्देशकालानुरोधेन च प्रत्यक्षविधानमपि न सम्भवति।

**तद्यथा –**

**वेदास्तावद् यज्ञकर्मप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः।**
**यस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेति स वेद यज्ञान्[1] ।।**

भारतवर्षे पंचांगानां निर्माणं त्रीणि पक्षोपरि आधारितं वर्त्तते – सौरपक्षः, आर्यपक्षः, ब्राह्मपक्षश्च। तेषु पक्षेषु सौरपक्षः स्पष्टतरमस्ति। विदितचरमिदं यत् पंचांगानां तिथि–वार–नक्षत्र–योग–करणमेव समवायः पंचांगमिति कथ्यते –

**तिथिर्वारं नक्षत्रं योगः करणमेव च।**
**पंचांगस्य फलं श्रुत्वा गंगास्नान फलं लभेत्[2] ।।**

सूर्याचन्द्रमसोः गत्याश्रितान्येतान्यांगानि। अनयोः सूर्याचन्द्रमसोः स्वचक्षुषा प्रत्यक्षीकरणं प्रत्यहमस्माभिः क्रियते। अतएव इमावेव साक्षित्वेन ज्योतिषशास्त्रं विद्वद्भिः समादृतौ स्तः। अनयोः प्रत्यक्षत्वेन ज्योतिषस्यापि प्रत्यक्षत्वं प्रतिपादितम्।
गणितज्यातिषे अहर्गणानयनस्य परम्परा त्रीणि सिद्धान्तोपरि आधारितं वर्त्तते – सिद्धान्तग्रन्थेन, तन्त्रग्रन्थेन

एवं च करणग्रन्थेन।

**सिद्धान्तः** – यत्र अहर्गणानयनं त्रुट्यादितः प्रलयकालपर्यन्तं क्रियते सैव सिद्धान्तः।

**तन्त्रम्** – यत्र अहर्गणानयनं कलियुगादितः अभीष्टकालपर्यन्तं क्रियते सैव तन्त्रम्।

**करणम्** – यत्र अहर्गणानयनं अभीष्टशकादितः अभीष्टकालपर्यन्तं क्रियते सैव करणम्।

**मकरन्दप्रकाशे** अहर्गणानयनं कलियुगादितः अभीष्टकालपर्यन्तं भवति, अतः मकरन्दप्रकाशः तन्त्रग्रन्थोऽस्ति।

यथोक्तम् **मकरन्दप्रकाशस्य** मध्यमाधिकारे –

**नवनगेन्द्रकृशानुसमन्वितो भवति शाकगणो गतवत्सरः।**
**कलिमुखादथ भानुगुणो गतैर्मधुसितादिकमासचयैर्युतः।।**
**त्रिकगतः स च खाद्रिहृदाप्तयुक् सुरहृदाप्तगताधिकमासयुक्।**
**खगुणसंगुणितस्तिथिसंयुतः पृथगसौ शिवसंगुणितस्तथा।।**
**गुणनभोधरणीधरभाजीतोऽथ स च लब्ध दिनावमवर्जितः।**
**दिनगणो रविमध्यम सावनः सितमुखो भवतीह निशादले[3] ।।**

श्लोकेऽस्मिन् कलियुगादितः अहर्गणानयनं क्रियते। यत्र इष्ट शकाब्दे 3179 संख्या योजितं गतकलिमान संख्या प्राप्यते।
लोके प्रायः **"मकरन्द"** नामात् भ्रमोत्पन्नः जायते। 'मकरन्द' नामाद् त्रीणि नामानि सन्ति –

**मकरन्दसारिणी, मकरन्दविवरणं** तथा च **मकरन्दप्रकाशः**। सर्वप्रथमं आचार्य मकरन्दाचार्येण 1400 शकाब्दां सूर्यसिद्धान्तोपरि मकरन्दसारिण्याः निर्माणं कृतवान्। यथोक्तम् –

**श्रीसूर्यसिद्धान्तमतेन सम्यग्**
**विश्वोपकाराय गुरूप्रसादात्।**
**तिथ्यादिपत्रं वितनोति काश्या**
**मानन्दकन्दो मकरन्द नामा[4] ।।**

विकरालकलिकालस्य कुप्रभावेन मानवानां मेधा उत्तरोत्तरं ह्रासावलोक्यते मकरन्दाचार्येण सरलमाध्यमेन पंचांगानां निर्माणाय सारिणिमिदं निर्माणं कृतवान्। उक्तसारिण्यां पंचांगनिर्माणार्थे किमपि पद्याः सन्ति, सा सामान्यजनबोध विरलमासीत्। तत् निवारणार्थं आचार्यदिवाकरेन् '**मकरन्दविवरण**' नामक गन्थस्य रचना कृतवान्। गन्थेऽस्मिन् केवलं सारिणीमाध्यमेन गणितादि प्रक्रिया वर्त्तते। तत्र फलादेशादि कथनं नास्ति। अतः मकरन्दसारिण्यां यत् अपूर्णता सन्ति, तत् निवारणार्थं आचार्यदिवाकरेन् '**मकरन्दविवरण**' नामक ग्रन्थस्य रचना कृतवान्। ग्रन्थेऽस्मिन् भौमादिग्रहाणां साधने बीजसंस्काराः दत्वा मध्यमग्रहे शीघ्रफलार्द्धं, मन्दफलं तथा च शीघ्रफलेन त्रीणि संस्कारेन् कृत्वा स्पष्टग्रहस्य साधनं कृतम्। सूर्यसिद्धान्ते यत् मध्यमग्रहे चतुःफलसंस्काराः उक्तम् तेन मन्दफलार्द्धस्य संस्कारः तात्कालिकं आकाशीयग्रहस्थितिनां दरीदृश्य मकरन्दविवरणकारेन् न स्वीकृतवान्। यथा –

**कृताशुखण्डे मृदृखण्डमुक्तं**
**तदत्र मान्दे खलु पर्यणं स्यात्।**
**अतः पुनर्मान्दफलार्द्धदान**
**मसाम्प्रतं सम्प्रति सम्प्रतीम[5] ।।**

मकरन्दविवरणे यत्किमपि अपूर्णता आसित् तत् निराकरणार्थं आचार्यनारायणदैवज्ञेन 1831 शकाब्द्यां "**मकरन्दप्रकाशः**" नामक ग्रन्थस्य रचना कृतम्। यथोक्तम् मकरन्दप्रकाशे –

**शशि शिखी गज भूमि शके समे**
**सितदलेऽमल कार्त्तिक मासके ।**
**शशिसुतस्य दिने हरिवासरे**
**विरतिरस्य बभूव तिथौ हरेः[6] ।।**

उपरिलिखित श्लोकानुसारेण ग्रन्थाऽस्य रचनाकालः 1831 शकाब्द्यां कार्त्तिकमासस्य शुक्लपक्षस्य बुधवासरः आसीत्।
ग्रन्थारम्भे ग्रन्थस्य प्रयोजनमपि इदमेव निरूपितम् –

**ग्रन्थस्य विस्तृति भयाद् गणितस्य सिद्धयै**
**त्यक्तं यदत्र सुधिया मकरन्केन ।**
**ज्ञातुं यदल्पमतिभिर्नितरामशक्यं**
**यस्मादतः सुसरलं प्रकरोमि सर्वम्[7] ।।**

मकरन्दकेन सुधिया ग्रन्थस्य विस्तृतिभयाद् गणितस्य (पंचांग गणितस्य) सिद्धयै यदत्र त्यक्तं यदल्पमतिभिः यस्मात् ज्ञातुं नितरामशक्यमतः सर्वं (अस्मिन् ग्रन्थे) सुसरलं प्रकरोमि।

**ग्रन्थस्य विवेचनम्**

मकरन्दप्रकाशस्य भागद्वयं वर्त्तते – पूर्वार्धं उत्तरार्धं च । ग्रन्थेऽस्मिन् चतुर्दशऽध्यायाः वर्त्तन्ते। पूर्वार्धे नवऽध्यायाः तथा च उत्तरार्धे पंचऽध्यायाः सन्ति।

**पूर्वार्धे** – तिथ्यादिसाधनाधिकारः, मध्यमाधिकारः, स्पष्टाधिकारः, संचाराधिकारः, वक्रमार्गोदयास्ताधिकारः, मिश्रकाधिकारः, संवत्सराद्यानयनाधिकारः, ग्रहणाधिकारः, निन्दयकालाधिकारश्च वर्त्तते।

**उत्तरार्धे** – वर्षफलविवेकाधिकारः, वृष्टिविवेकाधिकारः, सूर्यसंक्रमणविवेकाधिकारः, संवत्सरफलविचाराधिकारः, तथा च वर्शेषादिफलाधिकारः ।अन्ते ग्रन्थस्य वैशिष्टयम् वर्त्तते।

मकरन्दप्रकाशे तिथ्यादिसाधनं, अहर्गणानयनेन मध्यमग्रहः एवं च स्पष्टग्रहादि साधनं, राश्यादिसंचारः, मिश्रमानदिनमान सूर्योदयादि साधनं, ग्रहोदयास्तादिविचारः, ग्रहणगणितम्, वृष्टिविचारः, संवत्सर वर्शेषादि एवं धान्यादि विश्वा साधनं तथा च सर्वेषां फलादेशादि अपि निरूपितम्। अस्माद्धेतोः अस्य ग्रन्थस्य ज्ञानेन् कश्चिद् जनः सरलमाध्यमेन पंचांगानां निर्माणार्थे साफल्यं भवितुमर्हति।

**ग्रन्थकारस्य परिचयः –**

ग्रन्थकारः नेपालदेशान्तर्गते मण्डलस्य रौतहट्ट "लक्ष्मीपुरः" निवासीनः। स च मैथिल ब्राह्मणः आसीत्। तस्य पितुः नाम पण्डितसिंहेश्वरः तथा च पितामहः पण्डितवैजूलालः आसीत्। ग्रन्थकारः ज्योतिषशास्त्रस्य विशिष्ट विद्वांसः आसीत्। लोकोपकारकत्व वा पंचांगनिर्माणदृष्ट्या ग्रन्थास्य वैशिष्ट्यं सम्प्रत्यपि समीचीनमस्ति।

मकरन्दविवरणे वा मकरन्दप्रकाशे वर्तमानकालिकसारिणी न उपलभ्यते। अतएव मकरन्दसारिणी विना केवलं उक्तग्रन्थेन् पंचांगानां निर्माणं न भवितुमर्हति। यद्यपि चतुःशतकम् (400 वर्ष)वर्षाणि पूर्वं सारिणी निर्मितवान्, अतः सम्प्रति इदं सारिणी अनुसारेण यत् तिथ्यादि साधनं भवति, स तु सूक्ष्ममेव न भवति। तत्र संशोधनमपेक्षते। सारिण्यां विषयास्य स्थूलता मत्वा यत् सूक्ष्मगणितस्य विधानं कृतं तस्यापि मकरन्दीय पंचांगकारानां न स्वीकृतं ग्रन्थकारः स्यवमेव उक्तं यत् –

**वक्त्रादिकं स्थूलमिदं मयोक्तं सुखार्थमेवेति न तद् यथार्थम्।**
**अस्तोदयौ स्पष्टतरौ प्रसाध्यौ सिद्धान्तरीत्या कुसुतादिकानाम्[8]।।**

**ग्रहकौतुके** अपि –

**भविष्यैः सुगणकैः नक्षत्रयोगग्रहयोगोदयास्तादिभिर्वर्तमानघटनामवलोक्य**
**न्यूनाधिकभगणाद्यैर्ग्रहगणितानि कार्याणि[9]।।**

उपरोक्त सिद्धान्तोपरि सिद्धान्त ग्रन्थानां भगणादि मानं न समानमेव समुपलभ्यते। पंचांगानां दृश्यादृश्य गणितस्य विधानं शास्त्रसम्मतमस्ति। दृग्गणितैस्य स्वरूपं प्रासांगिकत्वं च चाक्षुष दृष्ट्या वेधोपलब्ध ग्रहादीनां दृग्गणितैक्यमिति। अस्य महत्वं प्राचीनकालादेव आरभ्यते। आर्यभटाद् मुरलीधर ठाकुर पर्यन्तं सर्वे सिद्धान्तकारैः विषयास्य महत्वं मन्यन्ते। ज्योतिषशास्त्रे न कोऽप्याचार्यो

दृक्प्रत्ययकारकस्य सिद्धान्तस्य विरोधं कृतवान्। इदं सत्यं यत् कालक्रमेण प्रायशः सर्वे सिद्धान्ताः इदानीं स्थूलाः संजाताः तत्रेदानीं दृक्प्रत्यययोग्यता न तथा विधा यथा अपेक्ष्यते। अत एतेषां पुनः संशोधनार्थं एषां दृक्प्रत्ययकारकत्वसिद्धये चास्माभिः कश्चन् समुचितः सर्वसम्मतश्च प्रयासः कर्त्तव्यः। नायं नूतनः प्रयासो भविष्यति अपि तु पूर्वाचार्याणामनुगमनं तेषां निर्देशस्य च पालनमेव भविष्यति। यतो हि काले काले तैः स्वकीयया प्रगल्भया धिया संशोधनेन परिष्कारबलेन चैतेषां शास्त्राणां संरक्षणं कृतम्। **कमलाकरभट्टस्तु** सुस्पष्टमुदघोषितवान् –

**"सुयुक्ता न मुन्युक्तिरप्यत्र शास्त्रे भवेत् कार्यवर्यस्य या दृग्विरूद्धा"।** अतोऽसंशयं वक्तुं प्रभवामि यद् दृग्विरूद्धा मुनीनामप्युक्तिः शास्त्रेऽस्मिन् समाहता नास्ति। अनया उक्तया इदं प्रतीयते यत् तदानीमपि एतादृशीं स्थितिरासीत्। यद्यपि कमलाकरस्य आक्षेपस्थानं भास्कर एव विशेषेणासीत् तथापि वाक्यमिदं दृक्सिद्धान्ते तस्य दृढ़ां निष्ठां प्रकटयति। आचार्यभास्करो दृक्सिद्धान्तस्यैव समर्थका आसन् परं कमलाकरेण स्थाने स्थाने तस्य सिद्धान्तानां खण्डनं कृतं कुत्रचित् द्वेषबुद्धया कुत्रचिच्च शास्त्रदृष्ट्या। भवतु नाम भास्करोऽपि सिद्धान्तशिरोमणौ स्पष्टरूपेण स्वाभिमतं दृक्सिद्धान्तं प्रति प्रकटितवान् –

**यात्राविवाहोत्सवजातकादौ खेटैः स्फुटैरेव फलस्फुटत्वम्।**
**स्यात् प्रोच्यते तेन नभश्चराणां स्फुटक्रिया दृग्गणितैक्यकृद्या[10]।।**

आर्षग्रन्थरूपेण प्रतिष्ठितस्य सूर्यसिद्धान्तस्याप्ययममेवपक्षः। तत्राऽपि दृक्तुल्यानामेव ग्रहाणां साधनार्थं प्रतिज्ञा वर्तते।

**तत्तद् गतिवशान्नित्यं यथा दृक्तुल्यतां ग्रहाः।**
**प्रयान्ति तत् प्रवक्ष्यामि स्फुटीकरणमादरात्[11]।।**

ज्योतिषशास्त्रीयग्रन्थेषु एतादृशी प्रतिज्ञा स्वाभाविकी शास्त्रस्वरूपानुरूपा च। परं पुराणेष्वपि दृक्सिद्धान्तस्योल्लेखः दृश्यते।

**तिथिस्वरूपविमर्शः ग्रन्थानुसारेण –**

मकरन्दसारिणीनिर्माणाब्दे मध्यममानेन वर्षारम्भकालिकसंक्रान्ति तिथ्यन्तयोरन्तरघटिकादिकाः 3/49/38/2 एतावन्मिताः गणितेन समागतास्ततः पंचदशभिर्गुणितास्तदन्तर घटिकादिकाः 50/24/30/30 एतावन्मिताः भवन्ति। तेन पंचदशमिताब्दे संक्रान्ति तिथ्यन्तयोरन्तरं दिनान्तरतुल्यं न जातम्। परं च षोडशे वर्षे तदन्तरं स्यादेवातस्तिथिकन्द साधनार्थं षोडशाब्दान्तरिताः व्यवस्थितशकाब्दाः कल्पिताः। तिथिकन्दपत्रे व्यवस्थितशकाब्दीय मध्यमतिथिवारादिकाः वल्यंकाश्च लिखिताः सन्त्यतो व्यवस्थितशकाब्दतुल्येष्टशकाब्दे तदेव तिथिकन्दो भविष्यति। स च देशान्तरेण संस्कृतो स्वदेशीयः स्यात्।
अथ व्यवस्थितेष्टशकाब्दयोरन्तरं परमं षोडशतुल्यं स्यात्तेन तिथिकन्दपत्रे तदन्तर तुल्यप्रतिसावनवर्षाकालिकस्फुटरविचन्द्राभ्यां साधितास्तिथिवारादिका अन्तर कोष्ठकाधो व्यवस्थिताः सन्ति। अतो व्यवस्थितेष्टशकयोरन्तरं विधाय तदन्तरप्रमितकोष्ठकाधो लिखितास्तिथिवारादिकाः यदि व्यवस्थितशकाब्दीयतिथिवारादिषु योज्यन्ते तदेष्टदशकाब्दीयस्तिथिकन्दः स्यादिति।
**मकरन्दप्रकाशे** तिथि साधनार्धं व्यवस्थित शकात् कन्दानयनं, चक्रसाधनं दैनिकवल्लिका साधनं च भवति। **तिथिक्षयलक्षणम्** यथा –

**एक एव यदा वारो भवेत्कोष्ठद्वये तदा।**
**तिथिक्षयं विजानीयात् पूर्व दण्डादिवर्जितम्[12] ।।**

**तथा च तिथिवृद्धिलक्षणम् –**

**विना कोष्ठान्तरं यत्र वाराधिक्यं प्रजायते।**
**तिथिवृद्धिं तदा तत्र ज्ञेयं गणितकोविदैः[13]।।**

सम्प्रति हि पंचांगवयवभूतां तिथिमधिकृत्य महान् विवादः प्रचलति। तत्र दृक्प्रत्ययकारिका कदम्बप्रोतीया एव तिथिर्ग्राह्या इति केषांचन्मतम्। बाणवृद्धिरसक्षया ध्रुवप्रोतीया एव तिथिर्ग्राह्या इत्यपरेषां मतम्।
अत्र ब्रूमः – इदानीन्तनेषु पंचांगेषु सप्तवृद्धिदशक्षया तिथिरेव व्यवहि्यते,न तु बाणवृद्धिरसक्षयेति। तत्रादाविदं विचारणीयं यत् कया रीत्या साधिता तिथिः शुद्धाः दृक्प्रत्ययकारिका च भवेदिति।
सूर्याचन्द्रमसोः सकाशादेव तिथिसाधनं क्रियते।तच्च सूर्याचन्द्रमसोरस्थित्वात् तिथिमानं न शाश्वतिकं भवितुमर्हति। अतो भवेन्नाम कदाचित् कस्मिन् काले बाणवृद्धिरसक्षयात्मिका तिथिः शुद्धा, इदानीं तु सा न व्यवहार योग्या। इतिहासपृष्ठावलोकनेनेदं स्पष्टं यत् कालभेदात् तिथेरपि ह्रासवृद्धयोः क्रमे परिवर्तनं भवितुमर्हति।
वस्तुतः तिथ्यादि साधने अदृश्य एवं च ग्रहणोदयास्तादीनां दृश्य गणितस्य आवश्यकता भवति। सिद्धान्ततत्त्वविवेके निरूपितम् –

**अदृष्टफलसिद्धयर्थं यथार्कात् युक्तिः कुरू।**
**गणितं यदि दृष्टयर्थं तद् दृष्युद्भवतः सदा।**
**नक्षत्रग्रहयोगेषु ग्रहास्तोदयसाधने।**
**श्रृंगोन्नतौ तु चन्द्रस्य दृक्कर्मादाविदं स्मृतम्[14]।।**

मकरन्तादनन्तरं आचार्य श्री गणेशदैवज्ञेन उक्त विषयस्य ध्यातव्य **"ग्रहलाघवम्"** नामक ग्रन्थस्य रचना 1442 शकाब्द्यां कृतवान्। तस्मिन् ग्रन्थे स्पष्टग्रहस्य रीति सूक्ष्ममेव वर्तते। स्पष्टसूर्यचन्द्रेन दैनिक तिथ्यादिसाधनं शुद्धं भवति। यद्यपि अयनांश साधनं मकरन्दीय शुद्धमेव भवति, परं च तात्कालिकं ग्रहलाघवीय अयनांशः वेधोपलब्धस्य आसन्नमेव, अस्माद्धेतोः ग्रहलाघवीय अयनांशाः प्रचलितम्। मकरन्दानुसारेण वार्षिक अयनगतिः 54 विकला भवति तथा च ग्रहलाघवानुसारेण अयनगतिः 1 कला भवति। आधुनिकं वैज्ञानिक मतानुसारेण वार्षिक अयनगतिः 50.2 विकला भवति। अयनगतेः सम्बन्धिनां विषये वैज्ञानिकानां विभेदमस्ति अतः तस्य विषयस्य अत्र त्याज्य अन्य विषयस्य उपस्थापयामि। वस्तुतः तदर्थं भारतवर्षे एकं विशिष्ट वेधशाला निर्माणं आवश्कता वर्तते।
भारतवर्षे अनेकेनां सारिण्यां आधारोपरि पंचांगानां निर्माणं भवति। तेषु सारणेः मकरन्दीय सारिणी अत्यन्तं सरलमस्ति।

**अत्र निष्कर्षः** – दृक्प्रत्यय सिद्धयर्थं भारतीय सिद्धान्तेषु परिष्कारोऽपेक्ष्यते। तत्र परिष्कारस्य स्वरूपं विद्वदभिः सम्भूय विचारणीयम्। अन्यथा शास्त्रस्य रक्षणमपि दुष्करं भविष्यति। दृक्प्रत्ययस्योदघोषः भारतीयशास्त्रकाराणामेव वर्तते। अतो नान्यः पन्था परिष्कारं विना।

**'आदित्यसिद्धान्त भवे च सूक्ष्मम्'** इति परिभाषया सूर्यसिद्धान्तोपरि निर्मितं यत् मकरन्दप्रकाशस्य ग्रन्थस्य महत्ता लोके समीचीनमेव। कथं सूर्यसिद्धान्तेन मकरन्दीयसारिण्याः निर्माणं अभवत् यदि वयं, (पंचांगकारः) अस्य विषयस्य ज्ञानं सम्यक् रूपेण क्रियते तथा साम्प्रतिकत्वेन सारिण्यां संशोधनं क्रियते तर्हि पंचांगनिर्माणानां क्षेत्रे नूतन आविष्कारः भविष्यति । नास्ति इमे संशयः, मे इति विश्वासः।
अन्ते –

**नित्यं ज्ञानं वितर भगवन् भूयसे मंगलाय ।।**

**सन्दर्भ ग्रन्थ सूची –**


1. वेदांग ज्योतिष – महात्मा लगध,श्लोक – 1
2. संवत्सरावली – टीकाकारः पण्डित हीरालाल मिश्रः, श्लोक – 3
3. मकरन्दप्रकाशः – मध्यमाधिकारः, श्लोक संख्या – 1,2,3,4
4. मकरन्दप्रकाशः – आमुख, पृष्ठ संख्या – 3
5. मकरन्दविवरण – अध्याय – 1
6. मकरन्दप्रकाशः – आमुख,पृष्ठ – 4
7. मकरन्दप्रकाशः – तिथ्यादिसाधनाधिकारः श्लोक – 2
8. मकरन्दप्रकाशः – आमुख – पृष्ठ संख्या – 5
9. ग्रहकौतुकम् –
10. सिद्धान्तशिरोमणि – स्पष्टाधिकारः, श्लोक :1
11. सूर्यसिद्धान्तः – स्पष्टाधिकारः, श्लोक – 14
12. मकरन्दप्रकाशः – तिथ्यादिसाधनाधिकारः श्लोक संख्या –26
13. मकरन्दप्रकाशः – तिथ्यादिसाधनाधिकारः श्लोक संख्या –27
14. सिद्धान्ततत्त्वविवेकः – म.अ. दृष्टिवैचित्र्य श्लोक 319–326